संस्कृतवार्ता:

20.08.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· सर्वोच्चन्यायालयेन कोलकाता-चिकित्सालये एकस्याः महिला-चिकित्सिकायाः दुष्कर्म-हत्या-प्रकरणे स्वास्थ्यकर्मिणां सुरक्षायै राष्ट्रियकार्यबलस्य निर्माणं कृतम् अस्ति।

· भारत-मलेशियाभ्यां पारस्परिक-सहयोग-क्षेत्रेषु अनेकानि सन्धिपत्राणि हस्ताक्षरितानि ।

· सङ्घ-लोक-सेवा-आयोगः पार्श्वप्रवेशं प्रति पुनर्निर्दिष्टं विज्ञापनं निरसितवान्।

· जम्मू-कश्मीर-प्रदेशे, विधानसभा-निर्वाचनस्य प्रथमस्य चरणस्य नामाङ्कन-प्रक्रिया समारब्धा।

· भारतीय-ऋतुविज्ञान-विभागेन आगामि दिवसद्वयोः पूर्वोत्तर-क्षेत्रेषु प्रचण्डवृष्टेः सम्भावना व्यक्तीकृता आस्ति ।

<u>सर्वोच्चन्यायालयः-कोलकाता</u>

सर्वोच्चन्यायालयेन स्वास्थ्यकर्मिणां सुरक्षायै राष्ट्रियकार्यबलस्य निर्माणं कृतम् अस्ति। मुख्यन्यायाधीशः डी. वाई. चन्द्रचूड़स्य नेतृत्वे पीठेन कोलकाता-चिकित्सालये एकस्याः महिला-चिकित्सिकायाः दुष्कर्म-हत्या-प्रकरणस्य श्रवणकाले कार्यबलाय सप्ताह-त्रयानन्तरं स्वस्य अन्तरीम-प्रतिवेदनं, मासद्वयानन्तरं च अन्तिम-प्रतिवेदनं समर्पयितुं निर्देशः दत्तः। मुख्यन्यायाधीशः अवदत् यत् न्यायालयः महिलानां सुरक्षां निश्चेतुं देश-विदेशात् आगतानां वैद्यानां सुरक्षायै राष्ट्रिय-कार्यबलस्य स्थापनां करोति । एतत् कार्यबलं दिङ्-निर्देशान् अनुशंसयिष्यति ये सम्पूर्णे देशे प्रवर्तयिष्यन्ते । सम्पूर्णे देशे वैद्यानां स्वास्थ्य-कर्मिणां च असुरक्षित-कार्य-परिस्थितेः विषये चिन्तां प्रकटयन् न्यायालयः अवदत् यत् विद्यमान-विधिः वैद्यानां संस्थागत-सुरक्षां पर्याप्ततया न व्यक्तीकरोति । न्यायालयः अवदत् यत् तेन वर्गीकृत-विषयेषु अवधानं प्राप्तुं कोलकाता-नगरस्य आर्. जी. कर्-चिकित्सालये चिकित्सिकायाः दुष्कर्मस्य, हत्यायाः च विषये स्वप्रेरणया अवधानं स्वीकृतम् इति।

न्यायालयः अवदत् यत् व्यावहारिक-धरायां परिवर्तनार्थं देशः अन्यस्य दुष्कर्मस्य, हत्यायाः च प्रतीक्षां कर्तुं न शक्नोति इति।

<u>प्रधानमन्त्री-मलेशिया</u>

भारत-मलेशियाभ्यां श्रम-आजविका-क्षेत्रे, आयुर्वेद-पारम्परिक-चिकित्साविधिक्षेत्रयोः, डिजिटल-तन्त्रज्ञान-संस्कृति-पर्यटन-युवा-क्रीडा-सहयोग-क्षेत्रेषु च अनेकानि सन्धिपत्राणि हस्ताक्षरितानि । द्वावेव देशौ लोक-प्रशासनस्य, शासन-संशोधनस्य, परस्परसहयोगस्य क्षेत्रे चापि सन्धिपत्रेषु हस्ताक्षराणि कृतवन्तौ । नवदिल्ल्यां प्रधानमन्त्रिणा नरेन्द्रमोदिना मलेशिया-देशस्य समकक्षीयेन दातो-सेरी-अन्वर्-बिन्-इब्राहिम् इत्यनेन सह प्रतिनिधिस्तरीय-वार्तायाः अनन्तरं एतेषु सन्धिपत्रेषु हस्ताक्षराणि कृतानि। संयुक्त-पत्रकारसम्मेलनं सम्बोधयता प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रोक्तं यत् भारत-मलेशिया-देशौ समग्र-सामरिक-सहभागित्वं वर्धयितुं निर्णयम् कृतवन्तौ । श्रीमोदीवर्यः अवदत् यत् द्वयोः देशयोः मध्ये रणनीतिक-सहभागित्वं दश-वर्षाणि पूरयिष्यति । विगतद्वयोः वर्षयोः अस्यां सहभागितायां नूतनः वेगः समागतः अस्ति। सः अवदत् यत् प्रतिनिधि-स्तरीयायां वार्तायां उभयपक्षौ परस्पर-सहयोगस्य सर्वेषु क्षेत्रेषु विस्तृत-चर्चां कृतवन्तौ । भारत-मलेशिया-देशयोः मध्ये आर्थिकसहयोगस्य प्रचुर-सम्भावनाः सन्ति इति श्रीमोदी कथितवान् । फिन्टेक्, सेमिकण्डक्टर्स्, रक्षा-उद्योगः, कृत्रिम-बुद्धिः, क्वाण्टम्-तन्त्रज्ञानम् इत्यादिषु नूतनक्षेत्रेषु सहभागं वर्धयितुं आवश्यकता अस्ति इति अपि प्रधानमन्त्री अवोचत् । सः अवदत् यत् भारतस्य यू पी आई इत्येतत् मलेशिया-देशस्य पेनेट् इत्यनेन सह योजयितुं उभयपक्षौ अपि कार्यं करिष्यतः । अस्मिन् अवसरे मलेशिया-देशस्य प्रधानमन्त्री दातो 'सेरी अन्वर् बिन् इब्राहिम् अवदत् यत् बहूनि क्षेत्राणि सन्ति यत्र उभयपक्षाभ्यां समधिकम् अन्वेषणं कर्तव्यम् अस्ति। सः अवदत् यत् भारतं समृद्धेतिहास-संस्कृति-सभ्यता-समन्वितं महत् राष्ट्रम् अस्ति ।

<u>सङ्घ-लोक-सेवा-आयोगः-निरसनादेशः</u>

सङ्घ-लोक-सेवा-आयोगः पार्श्वप्रवेशं प्रति पुनर्निर्दिष्टं विज्ञापनं निरसितवान्। सूचना-प्रसारण-मन्त्री अश्विनीवैष्णवः अकथयत् यत् आरक्षणस्य सिद्धान्तैः सह पार्श्वप्रवेशस्य संरेखनस्य निर्णयः प्रधानमन्त्री-नरेन्द्र-मोदी-वर्यस्य सामाजिक-न्यायं प्रति प्रतिबद्धतां दर्शयति इति। पूर्वं सर्वकारेण यू. पी. एस्. सी. इत्यायोगः प्रशासनिक-सेवायां पार्श्व-प्रवेश-सम्बद्धं विज्ञापनं निरसितुम् आदिष्टः आसीत्।

## जम्मू-कश्मीर-निर्वाचनाधिसूचना

जम्मू-कश्मीर-प्रदेशे, भारतस्य निर्वाचन-आयोगेन प्रख्यापितायाः अधिसूचनायाः अनन्तरं अद्य विधानसभा-निर्वाचनस्य प्रथमस्य चरणस्य नामाङ्कन-प्रक्रिया समारब्धा। पुल्वामा, अनन्तनाग्, शोपियां, कुल्गाम्, राम्बन्, किश्तवाड्, डोडा इत्येतेषु मण्डलेषु चतुर्विंशतिषु विधानसभा-निर्वाचनासनेषु प्रथमचरणे मतदानं सितम्बर-मासस्य अष्टादश-दिनाङ्के भविष्यति। अधिसूचनायाः अनुगुणं अभ्यर्थिनः एतेभ्यः निर्वाचनासनेभ्यः अगस्तमासस्य सप्तविंशति-दिनाङ्कपर्यन्तं नामाङ्कनं कर्तुं शक्नुवन्ति ।

## प्रशासनम्-उचितमूल्यापणम्

उपभोक्तृकार्यस्य खाद्यस्य सार्वजनिक-वितरण-विभागस्य च निदेशकेन प्रल्हाद-जोशी इत्यनेन अद्य नवदिल्ल्यां ,षष्टि-प्रति-मूल्य-आपणान् जन-पोषण-केन्द्रेषु परिवर्तयितुं प्रायोगिक-कार्यक्रमस्य आरम्भः कृतः। जनसम्मेलनं सम्बोधयन् श्री. जोशी वर्यः अवदत् यत् जनपोषण्-केन्द्राणि उचित-मूल्य-आपण-विक्रेतृभ्यः स्वस्य आयं वर्धयितुं साहाय्यं करिष्यन्ति इति। मन्त्री अन्यान् पञ्च-कार्यक्रमान् अपि उद्घाटितवान् । मेरा राशन् एप्, गुणवत्ता-प्रबन्धन-प्रणाली, गुणवत्ता-हस्तपुस्तिका, भारतीय-खाद्य-निगमस्य अनुबन्धपुस्तिका, प्रयोगशालानां प्रत्यायनम् चेत्यादीन् समेत्य अन्यकार्यक्रमाणाम् अपि शुभारम्भं विहितवान्। परिवर्तितानि जनपोषण-केन्द्राणि, मिलेट् इति महान्नानि द्विदल-धान्यानि, खाद्यतैलम् इत्यादयः पोषणसामग्र्यः प्रतिस्पर्धात्मकमूल्येषु प्रदास्यन्ति। पूर्वं उचित-मूल्य-आपणेषु केवलं गोधूमाः तण्डुलाः च उपलभ्यन्ते स्म। एतानि केन्द्राणि उचित-मूल्य-आपण-विक्रेतृभ्यः अतिरिक्त-राजस्वं प्रदास्यन्ति। जनपोषण-केन्द्रस्य उपक्रमः India@2047 इति सभी को अनाज-पोषितसमाज इति सङ्कल्पेन सह सम्बद्धः अस्ति, येन प्रत्येकं नागरिकः पर्याप्तं पौष्टिकं च भोजनं प्राप्नुयात् इति सुनिश्चितं भवेत् ।

## प्रधानमन्त्री-श्रद्धाञ्जलिः

प्रधानमन्त्रिणा नरेन्द्रमोदिना पूर्वप्रधानमन्त्रिणे राजीव-गान्धिने श्रद्धाञ्जलिः अर्पितः। अवधेयं यत् अद्य राजीवगान्धीवर्यस्य जन्मजयन्ती अस्ति। लोकसभायां विपक्षस्य नेता, काङ्ग्रेस्-दलस्य च सांसदः राहुलगान्धी पूर्वप्रधानमन्त्रिणे राजीवगान्धिने पुष्पाञ्जलिं समर्पयितुं नवदिल्लीस्थं वीरभूमिम् अगच्छत् ।

भाजपा-बङ्गालः

कोलकाता-नगरे एकस्याः चिकित्सिकायाः कथित-दुष्कर्म-हत्या-प्रकरणम् अधिकृत्य टी. एम्. सी. - सर्वकारस्य उपरि भाजपा-दलेन अद्य प्रहारः कृतः। नवदिल्ल्यां प्रसार-माध्यमान् सम्बोधयन् भाजपा-दलस्य प्रवक्ता डा. सुधांशुत्रिवेदी आरोपान् प्रख्यातिवान् यत् अस्मिन् प्रकरणे साक्ष्यान् भिन्न-विधिभिः विनाशयितुं प्रयत्नाः कृताः सन्ति इति। सः अवदत् यत्, घटनायाः विषये टी. एम्. सी. सर्वकारं विरुद्ध्य सर्वोच्चन्यायालयेन उत्थापिताः प्रश्नाः गम्भीराः सन्ति इति। डा. त्रिवेदीवर्यः अवदत् यत् कोलकाता-नगरस्य आर्. जी. कर्-वैद्यकीय-महाविद्यालयस्य चिकित्सालयस्य च घटनायां पीडितायै न्यायं प्रदातुं केन्द्रसर्वकारः सर्वानपि प्रयासान् विधास्यति।

महाराष्ट्र-विशिष्टान्वेषणदलम्

महाराष्ट्रे , बदलापुर-नगरस्य विद्यालये बालिकायाः यौन-उत्पीडन-प्रकरणमभिलक्ष्य वरिष्ठा आई. पी. एस्. अधिकारी आरती-सिंह इत्यस्याः नेतृत्वे विशेष-अन्वेषण-दलस्य निर्माणं कृतम् अस्ति। उपमुख्यमन्त्रिणा देवेन्द्र-फड्नविस्वर्येण प्रोक्तं यत् ठाणे-नगरस्य आरक्षक-आयुक्ताय फास्ट्-ट्रैक्-न्यायालये अभियोगं प्रख्यापितुं प्रस्तावं दातुं निर्देशः दत्तः अस्ति इति।

भारतीय-ऋतुविज्ञान-विभागः

भारतीय-ऋतुविज्ञान-विभागेन आगामि दिवसद्वयोः पूर्वोत्तर-क्षेत्रेषु प्रचण्डवृष्टेः सम्भावना व्यक्तीकृता आस्ति । ऋतुविज्ञानविभागस्य अनुसारं, देशस्य मध्यभागेषु पश्चिम-विक्षोभस्य कारणात् मध्यमतः प्रबल-पर्यन्तं वृष्टिपातं समभवत् । R.K. जेनामणिः इत्येषः आकाशवाणीं संसूचितवान् यत् उत्तरप्रदेशस्य उपरि सैडोनिक्-आर्कुलेशन् इत्यस्य कारणात्, विभागेन पञ्जाब्-हरियाणा, उत्तराखण्ड्, हिमाचलप्रदेशेभ्यः श्वः यावत् प्रचण्डवृष्टेः सञ्चेतना दत्ता अस्ति। दिल्ल्याम् अद्य अनेकेषु भागेषु मध्यमतः प्रबलपर्यन्तं वृष्टिरभवत्, येन उष्ण-आर्द्र-वायुगुणात् आश्वस्तिः प्राप्ता।

।। इति वार्ताः।।